**Code No.: MFLS-02**

Total No. of Questions : 5 　　　　　　　　　　Total No. of Printed Pages : 2

# स्नातकोत्तरपरीक्षाः– २०१५

## एम्.ए. – विद्वदुत्तमा – प्रथमवर्षम्

## शास्त्रम् – संस्कृतसाहित्यम्

### भागः – १, पत्रिका – २

### विषयः – जयन्तिका

**दिनाङ्कः –** 26.3.2015 　　　　　　　　　　**गरिष्ठाङ्काः – ८०**

**समयः –** 10.00 A.M. to 1.00 P.M. 　　　　　　　　　　Max. Marks – 80

---

**I. एकेन वाक्येन उत्तरयत –** **10 × 1 = 10**

१. जग्गुवकुलभूषणकवेः पिता कः?

२. कविः कस्मिन् वयसि जयन्तिकां रचयामास?

३. जीवसेनो नाम राजा किंनामिकायां नगर्याम् आसीत्?

४. किंनामकः क्रव्यादः मखप्रियस्य तपोविघ्नमाचारति?

५. जीवसेनस्य सूतः कः?

६. वरमालिनी कुत्र वसति स्म?

७. विमतकेसरी किंनाम्न्यां राजधान्यां राजा आसीत्?

८. विमतकेसरिणः सचिवः कः?

९. चारुवक्त्रः कम् उद्दिश्य तपस्यामास?

१०. जयन्तिका बाणभ कृतस्य कस्य गद्यकाव्यस्य सदृशी इति प्रथा वर्तते?

**II. प्रश्नत्रयं विस्तरेण उत्तरयत –** **3 × 10 = 30**

१. जग्गुवकुलभूषणकवेः देशकालकृतीश्च अधिकृत्य प्रबन्धं रचयत।

२. जीवसेनः कीदृश आसीदिति निरूप्य तस्य दिनचर्यां वर्णयत।

३. मखप्रियस्य किं कष्टम् आपतितम्? जीवसेनेन च तत् कथं परि तम्?

४. वरमालिनी कुतो दुःखिता? चारुवक्त्रः कथं तां सान्त्वयामास?

५. चारुवक्त्रस्य तपः कीदृशम् आसीत्? तस्माद् भीताः इन्द्रादयः किमकुर्वन्?

**Code No.: MFLS-02**

**III.** चत्वारि वाक्यानि सप्रसङ्गं व्याख्यात – **4 × 5 = 20**

१. देवगन्धर्वयक्षकिन्नरेषु एवंविधनिशाचरनिहीनजन्मनः किं वा निदानम्?

२. किमु न ते नते मयि कृपा? क्षणमात्रं निपातय कटाक्षं कृपया।

३. योषितः पातिव्रत्यैकधना हि।

४. नहि रसालफलम् उपभोक्तुं शक्यते निम्बबीजम् उप्तवता अत्र।

५. तद्देहि देव! विजिगीषवे मह्यम् अप्रतिहतं प्रहरणम्।

**IV.** द्वयोः टिप्पणीं रचयत – **2 × 5 = 10**

१. गद्यकाव्यम्   २. विमतकेसरी

३. हिमालयः   ४. नारायणः

**V.** गद्यभागं व्याख्यात – **1 × 10 = 10**

सा तु मकरिका समाकर्ण्य, कर्णकर्कशं कापुरुषस्य तस्य शाठ्यं साध्वसकम्पित दया रोषकषायितलोचना गत्वा च सरभसं भवत्पित्रे विमतकेसरिणे निवेद्य, मद्दुःखमात्रं सद्यः तम् आनयति स्म मदुपकण्ठम्। स तु तव पिता रुदतीम् अवलोक्य च मां मत्पार्श्व एव निषण्णो विषण्ण दयः चेलाञ्चलेन परिमार्जयन् कपोलतलपतितं बाष्पसलिलम्, समुत्सारयन् करकमलैः विलुलितां चूर्णकुन्तलावलिम्, निवारयन् मधुरया गिरा दयगतम् अपरिमितं सन्तापम्, परामृशन् मृदुलतरेण करकमलतलेन मूर्धानं मन्दमप्राक्षीत्–सुदति कुतो रोदिषि? इति।

---